# WEST BENGAL STATE UNIVERSITY

B.A. Honours 1st Semester Examination, 2018

## SANACOR01T-SANSKRIT (CC1)

## CLASSICAL SANSKRIT LITERATURE (POETRY)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्चप्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः – 2×5 = 10

(क) प्रणवश्छन्दसामिव – कः तावत् प्रणवः ? कस्मिन् प्रसङ्गे कविना एवमुक्तम्।

(ख) किं तावत् रघुवंशस्य उत्सभूतं महाकाव्यम् ? अस्य महाकाव्यस्य कः रचयिता ?

(ग) परस्परविरुद्धाः गुणाः दिलीपे केन प्रकारेण सहावस्थायिनः भवन्ति ?

(घ) दिलीपस्य मन्त्रणा कीदृशी आसीत् ?

(ङ) दिलीपेन किम्प्रकारेण प्रजानां पितृपदं प्राप्तम् ?

(च) राज्ञः दिलीपस्य चरित्रस्य गुणत्रयम् उल्लिख्यताम्।

(छ) कौ जगतः पितरौ ? कालिदासेन तौ किमर्थं वन्दितौ आस्ताम् ?

(ज) "प्रांशुलभ्ये फले लोभादुद्वाहुरिव वामनः" – किमत्र प्रांशुलभ्यं फलम् ? कश्च वामनः?

### SECTION-B

2. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) अभीष्टसिद्धये पार्वत्याः साधनमार्गः कीदृशः आसीत् ? कुमारसम्भवमहाकाव्यस्य पञ्चमसर्गमाश्रित्य लिख्यताम्।

(ख) कुमारसम्भवमिति महाकाव्यस्य पञ्चमसर्गमनुसृत्य प्रदर्श्यताम् – 'उपमा कालिदासस्य' इति।

3. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत – 5×1 = 5

(क) यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते॥

(ख) तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता॥

## SECTION-C

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं प्रदेयम्। 10×1 = 10

(क) 'स वर्णिलिङ्गी विदितः समाययौ' – कस्तावत् वर्णिलिङ्गी ? एवं वेशधारणस्य किं प्रयोजनम् ? अत्र वनेचरमुखेन वर्णितः दुर्योधनशासनवृत्तान्तः लिख्यताम्।

(ख) विशदीक्रियतां किरातार्जुनीयाख्यस्य महाकाव्यस्य प्रथमसर्गमाश्रित्य 'भारवेरर्थगौरवम्' इति।

## SECTION-D

5. यथेच्छमेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्या क्रियताम् – 5×1 = 5

(क) निरत्ययं साम न दानवर्जितं न भूरिदानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया॥

(ख) प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधिमण्डलं भूवः।
स चिन्तयत्येव भियस्तवदेष्यतीरहो दुरन्ता बलवद्विरोधिता॥

## SECTION-E

6. अधोगतेषु विषयद्वयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टीका लिख्यताम्। 5×2 = 10
मेघदूतम्, अमरुशतकम्, जानकीहरणम्, बुद्धचरितम्।

——×——